योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ४०

चत्वारिंशः सर्गः ४०

श्रीराम उवाच ।

उत्पत्तिः कथमेतेषां जीवानां ब्रह्मणः पदात् ।

कियती कीदृशी चेति विस्तरेण वद प्रभो ।। १

श्रीवसिष्ठ उवाच ।

उत्पद्यन्ते यथा चित्रा ब्रह्मणो भूतजातयः ।

यथा नाशं प्रयान्त्येता यथा मुक्ता भवन्ति हि ।। २

यथा च परिवर्धन्ते तिष्ठन्त्यन्तर्हिता यथा ।

संक्षेपेण महाबाहो श्रृणु वक्ष्यामि तेऽनघ ।। ३

ब्राह्मी चिच्छक्तिरमला कल्पयन्ती यदृच्छया ।

सर्वशक्तिः स्वयं चेत्यं भवत्याकलनात्मकम् ।। ४

कलनाद्धनतामेत्य यत्किंचिदपि सा स्वयम् ।

संकल्पयति पश्चात्तत्तत्तामेति मनःपदम् ।। ५

मनःसंकल्पमात्रेण गन्धर्वपुरवत्क्षणात् ।

तनोतीदमसद्दृश्यं ब्राह्मीं स्थितिमिव त्यजत् ।। ६

चित्स्वरूपं परिकचच्छून्यमेवावतिष्ठते ।

यत्तद्दृश्यं स्थितं तत्स्याद्दृश्यमाकाशमेव तत् ।। ७

कृत्वा पद्मजसंकल्पं रूपं पश्यति पद्मजम् ।

ततो जगत्कल्पयति सप्रजापतिपूर्वकम् ।। ८

चतुर्दशविधानन्तभूतजातसघुंघुमा ।

सृष्टिरेवमियं राम चित्तनिर्मितिमागता ।। ९

चित्तमात्रमयी शून्या व्योममात्रशरीरिका ।

संकल्पमात्रनगरी भ्रान्तिमात्रात्मिका सती ।।१०

इह काश्चिन्महामोहा भूतानां जातयः स्थिताः ।

काश्चिदभ्युदितज्ञानाःकाश्चिन्मध्ये स्खलन्ति हि ।।११

भुवि संबध्यमानानां यान्त्येनामुपदेश्यताम् ।

सर्वासां भूतजातीनां या एता नरजातयः ।। १२

बह्वाधयो दुःखमया मोहद्वेषभयातुराः ।

तासां सम्यक्प्रवक्ष्यामि तावद्राजससात्त्विकीः ।।१३

यत्तदप्यमृतं ब्रह्म सर्वव्यापि निरामयम् ।

चिदाभासमनन्ताख्यमनादि विगतभ्रमम् ।। १४

निस्पन्दवपुषस्तस्य स्पन्दः सत्तैकदेशतः ।

घनतामेति सौम्येऽब्धौ चलता चलतामिव ।। १५

श्रीराम उवाच ।

अनन्तस्यात्मतत्त्वस्य एकदेशः क उच्यते ।

कथं विकारिता वा स्यात्कथं वा द्वयविक्रमः ।। १६

श्रीवसिष्ठ उवाच ।

तेन जातं ततोजातमितीयं रचना गिराम् ।

शास्त्रसंव्यवहारार्थं न राम परमार्थतः ।। १७

विकारितावयवितादिक्सत्तादेशतादयः ।

क्रमा न संभवन्तीशे दृश्यमानोदया अपि ।। १८

तं विना कल्पनैवान्या नास्ति नापि भविष्यति ।

कुतस्त्यौ क्रमशब्दार्थावुक्तयो व्यवहारजाः ।। १९

या येह कलना योऽर्थो यः शब्दो यो गिरां गणः ।

तज्जत्वात्तन्मयत्वाच्च तत्तत्पदमिवेष्यते ।। २०

तज्जः स एव भवति वह्नेर्वह्निरिवोत्थितः ।

जन्योऽयं जनकश्चायमित्युक्ता भेदकल्पना ।। २१

अयमस्मात्समुत्पन्न इतीयं या जगत्स्थितिः ।

आधिक्यं तत्क्रियाशक्तौ जन्यं जनकमेव वा ।। २२

इदमन्यदिदं चान्यदिति शब्दार्थविक्लवः ।

उक्तावेव न देवेऽस्ति प्रमितौ भिन्नता यतः ।। २३

तज्जयैव मनःशक्त्या स्वतः संज्ञा प्रवर्तते ।

दृढभावनया तस्मादिष्टोऽर्थः प्रतिपद्यते ।। २४

अग्नेः शिखाया एकस्या द्वितीया जनकेति या ।

उक्तिवैचित्र्यमेवैतन्नोक्त्यर्थेऽत्रास्ति सत्यता ।। २५

न जन्यजनकाद्यास्ताः संभवन्त्युक्तयः परे ।

एकमेव ह्यनन्तत्वात्किं कथं जनयिष्यति। ।। २६

उक्तेरेव स्वभावोऽयमुक्तेरुक्तिरनन्तरम् ।

प्रतियोगिव्यवच्छेदसंख्याद्यर्थे न युज्यते ।। २७

ऊर्मिजालमिवाम्भोधौ परे यः परिदृश्यते ।

शब्दोऽर्थकलनाकारस्तद्ब्रह्मैव विदुर्बुधाः ।। २८

ब्रह्म चिद्ब्रह्म च मनो ब्रह्म विज्ञानवस्तु च ।

ब्रह्मार्थो ब्रह्म शब्दश्च ब्रह्म चिद्ब्रह्म धातवः ।। २९

ब्रह्म सर्वमिदं विश्वं विश्वातीतं च तत्पदम् ।

वस्तुतस्तु जगन्नास्ति सर्वं ब्रह्मैव केवलम् ।। ३०

अयमन्योऽयमन्योऽयं भाग इत्यम्बरात्मनि ।

मिथ्याज्ञानविकल्पोक्तिर्वाचि सत्यार्थतात्र का ।। ३१

वह्नेः शिखेव जातेयं शिखेति मनसोऽभिधा ।

चापलोत्थविकल्पश्रीर्वस्तुतः स्यान्न सिद्ध्यति ।। ३२

असत्यैव विकल्पोक्तिः सत्यभावो विकल्पते ।

तमोपहतदृष्टित्वाद्द्विचन्द्रज्ञानदोषवत् ।। ३३

सर्वस्मात्सर्वगात्तस्मादनन्ताद्ब्रह्मणः पदात् ।

नान्यत्किंचित्संभवति तदुत्थं यत्तदेव तत् ।। ३४

ब्रह्मतत्त्वं विना नेह किंचिदेवोपपद्यते ।

खर्वं च खल्विदं ब्रह्मेत्येषैव परमार्थता ।। ३५

एवंप्रायश्च हे प्राज्ञ सिद्धान्तस्ते भविष्यति ।

तत्रैवोदाहरिष्यामः सिद्धान्तार्थोक्तिपञ्जरम् ।। ३६

इहाविद्यादिकाः केचिद्विद्यन्ते नेतरक्रमाः ।

ज्ञास्यस्यलमशेषार्थांस्तत्तदज्ञानसंक्षये ।। ३७

अवस्तुसंक्षये वस्तु यथावस्तु प्रसीदति ।

यथा च दृश्यते दृश्यं जगन्नैशतमःक्षये ।। ३८

यदिदमखिलमाततं कुदृष्ट्या

तदुपशमे तव राम निर्मलामे ।

अवितथपदनिर्मले भविष्य-

त्यवितथमेव न संशयोऽत्र कश्चित् ।। ३९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मो० स्थितिप्रकरणे ब्रह्मैवेदं सर्वं जगदिति प्रतिपादनं नाम चत्वारिंशः सर्गः ।। ४० ।।